स्यात्, न खलु खरविषाणे कुण्डलादिः, न च "अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदु"रिति अवयती श्रुतिः ब्रह्मण- [illegible] ; असत्त्व(तुच्छत्व)विलक्षणत्वमात्र- आकारभ्रमादिमेव कुरुतेति प्रत्युक्तम्, अपसिद्धान्ताच्च; विशेषस्तु कल्पितत्वे तज्जिज्ञासावैयर्थ्यं, न हि अज्ञातसद्- पूर्वाकारकल्पनार्थं शुक्तिकल्पितमिथ्याकारजिज्ञासयैव वा शरीर- कल्पितमोहनाशः कश्चिदपि स्यात्, कल्पिताकारमिथ्यात्व- बोधनार्थमिति तु स्यात्, न तर्हि ब्रह्मजिज्ञासेयम्, अपि त्वब्रह्माकारमिथ्यात्वबोधजिज्ञासेति, ततः किमिति चेत्, श्रुति- सूत्र स्वरसार्थभङ्ग(त्याग) स्यात्, [illegible] मिति [illegible], कल्पितभेदमिथ्यात्वधीरेव [illegible] रिति चेत्, न, [illegible] अपि [illegible] तद्वि- [illegible] ; [illegible], कल्पिताकार मिथ्यात्व- [illegible] मिति तज्जिज्ञासानुपपत्ति- रिति, तदपि यदि [illegible] न [illegible] ; [illegible], मिथ्यात्वे [illegible], [illegible] परस्परविरोधे (?) [illegible] ; यदि [illegible] कल्पितं, [illegible] कल्पिताकार [illegible] निवृत्तिः ; [illegible] (किं) [illegible], [illegible] (द्वय) [illegible] वा तज्जिज्ञासामिति. [illegible] जिज्ञासो-



Digitized by Google

बन्धो ; ईश्वरस्य स्वरूपत्वसाधनात्, जीवस्य दुःखस्याप्याया अपि स्वरूपान्वितत्वात् सत्यत्वात् ; उदारगुणसागरः परमपुरुषः स्वाराधनात्मकशास्त्रार्थमधीतवतस्त्रिवर्गमपवर्गं च प्रयच्छतीति हि शास्त्रीयमर्यादा, स यदि स्वयमेव भ्राम्येत् स्वाश्रितपालीयपक्षिकगुणहीनो वा न तर्हि जिज्ञास्यः, "स्वरूपेऽप्यप्रमादे"ति न्यायात्, कल्पितसार्वज्ञ्यादि कोशात् तदभावेऽपि तीर्थविद्वन्वा तत्र भजनम् स्यादिति चेन्न ; कल्पितस्य सार्वज्ञ्यादेर्जिनादिष्वपि सिद्धेस्तत्प्रसक्तिप्रसङ्गात् ; सर्वेषां तु न तत्कॢप्तिरिति चेन्न ; अविशेषात् ; महाजनपरिग्रहविशेष इति चेन्न ; सर्वेषां सर्वतन्त्रस्वतन्त्रविद्वत्तां कस्यचिदपि प्रामाणिकत्वादिप्रसङ्गराहित्यासिद्धेः, प्रागुर्यस्य जिज्ञासादमप्रयोजकत्वात् . यत्तु तीर्थादिवदिति, तत्तत्स्वपक्षेन, यदि तत्स्वयमेव तदुपलब्ध्या(तदुपलब्ध्या)प्रवाचोऽन्यः ; न हि जिज्ञासतत्त्वत्सम्पूर्णत्वमेव प्रमाणीति नैगमः पन्थाः ; एतत्सकलन्यायेन वैनमन्त्रिक्षेत्रसन्निवेशेऽपि तद्विषयाणानुपपत्तिर्द्रष्टव्या . तदेतदखिलमभिसंधाय ब्रह्मशब्दाभिधेयमुभयलिङ्गं सर्वेश्वरं प्रस्तुत्य तस्यैवारभ्यत्वे जिज्ञासितत्वमाह "तत्पचयमातुरैरस्वतन्त्राय स एव जिज्ञास्य" इति ।

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्याम्
जिज्ञासानुपपत्तिवादो द्वितीयः ।

---

Digitized by Google

श्रीमते निगमान्तमहादेशिकाय नमः ।

शतदूषण्याम्

# ऐकशास्त्र्यसमर्थनवादस्तृतीयः ।

त्रय्यन्ताः कर्मभागेन सौहार्दं समधिन्वताः ।
मुक्तिं यच्छन्ति नारायणमनन्तमुपासके ॥

निःश्रेयसार्थिनामध्ययनविधिनाऽध्यापनविधिना वा प्रयुक्तमध्ययनं सम्पूर्णस्य (वेदस्य) स्वाध्यायविषयमिति. रागतो विधितो वा प्रयुक्तात् तदर्थविचारोऽपि तदुपयोगी; तयोस्तु-ल्लोकत्वाभावात्, ननु विधिप्रयुक्तौ सम्भवत्ययोगः, रागप्रयुक्तौ तु स्यात्, स्वतःरागस्य प्रत्युपपत्तेः, नैवम् विकल्पासहत्वात्; किं सर्वेष्वपि विचारप्रसङ्गः किं वा कर्मणि; क्रमशः, पुरुषस्य चतुर्ष्वपि पुरुषार्थेषु रागसंभवात्, कर्मणश्च भोगसंभवे विरोधाभावाच. सन्ति पुरुषास्तदुभयथाविधाः. यस्य तु कामिन्नोरागः तस्यैकदेशविचारे का विधिविवक्षेति चेत्; यस्य लोकाप्रत्यक्षेप्सुतमतेर्दिर्वर्गमात्रविषयस्य वेदोदितेषु चतुर्ष्वप्यभावात्, यस्य चापवर्गापेक्षा, तस्य वेति प्रसङ्गात्. ब्रह्मसंस्थाऽधिकारः स्वार्थं प्रति ब्रह्ममीमांसेति चेत्, तुल्यं चिकार्षायामपि. किन्तु पुरुषार्थरागः, स्वर्गप्रयत्नादिरागादपि कर्मविचारसामर्थ्यमस्ति; तेन न ब्रह्ममात्रविचारप्रसङ्गः. कर्ममात्रे तु विचारं प्रसञ्जयन् कर्ममीमांसकस्य राद्धमी-

Digitized by Google

पारलौकिककर्मानुष्ठानयोग्यतामेवापेक्षेदिति कथमसौ कर्म निवर्तते. न चतुर्थः, तत्सम्बन्धस्य सत्यत्वेन भ्रमत्वासिद्धेः. न पञ्चमः, ब्रह्मविचारशास्त्रानारम्भप्रसङ्गात्, सूत्रकारादिविरोधाच्च, शास्त्रवन्निष्टफलानां विचाराणामविरोध इति चेत्, तस्य कर्माधिकारहेतुत्वमपि भवता स्वीकारात्, किञ्च यावता कर्माधिकारो निवर्तत इति मनुषे तावता वेदान्तश्रवणाद्यधिकारोऽपि निवर्तेत इति ब्रह्ममीमांसैव न स्यात्, न चायमिष्टप्रसङ्गः, तत्रत्यानामीदृशपूर्वमतदभ्युपगमात्. ननु कर्ममीमांसाया वेदान्तविचारानुपयुक्तत्वात् तथा ब्रह्मैकवाक्यत्वमपि नेत्, अनुपयोगासिद्धेः; कोऽयमनुपयोग इति चेत् न्यायोपजीवकत्वात्, तथाहि, वाक्यान्तरनिमित्ताप्रामाण्यनिरासयोग्यं प्रमाणलक्षणमत्यन्तोपयुक्तम्, शेषलक्षणोपजीवी च गुणोपसंहार पादः, तार्तीयाश्च श्रुतिलिङ्गाद्यर्थविचाराः, चातुर्थिकश्च वर्णाश्रमादिधर्माणां विद्याङ्गत्वानङ्गत्वप्रयुक्तादिविमर्शो निरूप्यते, गतिचिन्तायाश्च पाञ्चमिकः क्रमः, षाष्ठी विद्याधिकारचिन्ताऽपि विशेष्यते, फलितैकत्वस्य "तदेकरूपं यदमुष्यरूपम्" इत्यादिषु, अतः कर्ममीमांसानिरूपितस्वरूपैस्तत्त्वार्थैरेव हि वेदान्तार्थो निर्णीयते, अपूर्वास्तत्र कतिपये न्यायाः, विद्यास्वरूपभेदादिनिरूपणाय; अन्यथा "यजेत" इत्यादिवाक्यार्थानवबोधप्रसङ्गात्, न ह्यविदितपदार्थविशेषो वाक्यार्थावबोधी स्यात्, यजादिरूपणञ्च तत्र तत्र क्रियते, तदपि यज्ञा-

Digitized by Google

नापन्नाय तटिलते कमलयानित्यामपायद्वये
भक्तानामभिलाषपूरमखिलान्संवर्षुकायार्थिताम् ।
वेतच्छायचलद्गरुत्पक्षिवपुषे भव्याय कृष्णात्मने
जीमूताय चतुर्मुखाध्वरफलीभूताय तस्मै नमः ॥

चरणयुगलमेव यस्य लब्ध्वा
धनमनपायि मुनिर्वृता महान्तः ।
तृणमिव विजहुः पुरान्यदर्थान्
अवतु स मारुटिकाधराधरेन्द्रः ॥

मौदन्तीनां श्रुतिपरिषदां साधुतत्त्वावबोधे
पीडां लुम्पन्कुमतिकलितां भाष्यपीयूषवर्षैः ।
विश्वपाशे हरिमभिमुखं सत्यकामं वितन्वन्
साक्षादस्मान्यतिपरिवृढश्श्रेयसामेकसूतिः ॥

तुरगवदनतेजो बृंहिताश्चर्यशक्तिः
कविकथकमृगेन्द्रस्सर्वतन्त्रस्वतन्त्रः ।
जयति गुरुरबाधां वेदचूडार्थसंस्थाम्
अवितरजनसम्यां लम्भितो रङ्गभर्त्रा ॥

अव्याजसौहृदमशेषजनेषु साक्षात्
नारायणो नरवपुर्गुरुरित्यृषीणाम् ।
वाचं समर्थयितुमच्युतमेव जातं
श्रीश्रीनिवासगुरुवेषमहं भजामि ॥

वेदान्तार्थाभिभावं भवदुदितपरं शत्रुघ्नोनेश्वरोऽहं
वक्तुं बोद्धुं च भेको न हि जलधिगतोऽप्यस्य पारं क्रमेत ।

नित्यशुद्धाध्यवसायेमति प्रतीयमानकर्तृ(क)त्वादिरूपाशुद्धेर्मिथ्यात्वज्ञानेन साधनानुष्ठानेन तन्निवृत्तेस्सफलत्वमिति भावः. नित्यशुद्धेः परमार्थत्वादारोपिताशुद्धाश्च न विरोध इति सदृष्टान्तं शङ्कते उपरक्त इति. ब्रह्मण्येवेति, "तदिदं विविधकुतर्ककल्पककल्पित"मिति भाष्येण तथावगमादिति भावः. शुक्तिरजतादौ पराभिमतमिथ्यात्वमभ्युपगम्य अविशेषात्परोक्तस्थलेऽपि तदापादनमभिप्रेत्याभ्युपगमादित्युक्तम्. भ्रमाद्याधारतयेति, अशुद्धिं प्रसञ्जयाम इत्यनुषङ्गः, आदिशब्देन तत्कार्यसुखदुःखशोकमोहादिः. अस्मदभिमताशुद्ध्याश्रयत्वेनायन्दृष्टान्त इत्याह न तथेति. स्वात्मनीति, इदञ्च ब्रह्मण्यारोपस्य स्वविषयत्वादुक्तं. वस्तुतस्तु स्वविषयत्वे न तात्पर्यं, किन्तु आरोपाश्रयत्वमात्रे, अन्यविषयारोपस्यापि दोषत्वात्, अध्यासस्य सविषयत्वाद्रागस्य च प्रकृतत्वाद्रागमध्यस्यतीत्युक्तम्, अन्यारोपस्यापि दोषत्वात्. एवं भ्रमरूपाशुद्ध्यभावात् दृष्टान्तवैषम्यमुक्तम्, इदानीन्तदङ्गीकृत्यापि वैषम्यमाह नचतत्कर्तृक इति, अन्यकर्तृक इति दृष्टान्तार्थं. भ्रान्तिरूपाशुद्धिरस्त्यपि न सैत्यास्यशुद्धिविरोधिनीत्युक्तं, तर्हितद्वदेवप्रकृतेऽपि शुद्ध्यशुद्ध्योरविरोध एवास्त्वित्यत्राह दृष्टत्विति. स्वदोषेणेति, अविद्ययेत्यर्थः, इयमप्येकाऽशुद्धिरित्यभिप्रायेण स्वदोषेणेत्युक्तं, यद्यप्यविद्यास्फटिकलौहित्यवदारोपिता, आरोप्यदोषत्वेन नाशुद्धिं प्रसञ्जयाम इति चोक्तं, तथाप्यारोपहेतुत्वेनैव दोषत्वमिति भावः, भ्रमाश्रय-

सान्तर्भाव इति इन्द्रियान्तर्भावो वा साक्षात्कारजनकवर्णान्तर्भावो वा विवक्षितस्स्यात्, पूर्वत्र तु मननस्योऽपि साक्ष्यान्तर्भाव इतिवदुपलम्भविरोधादशक्यं (क्यः) वक्तुम्, उत्तरत्र क्लिष्टप्रसङ्गता, ऐकाश्रयेऽसिद्धे सत्यवान्तरभेदाश्रयणाविरोधात्, तदेव तु कथमिति चेन्न, दशमस्त्वमसीत्यादौ तद्दर्शनस्य समर्थितत्वात्, वाक्यस्यैवापरोक्षधीजनकत्वे मनननिदिध्यासनविध्यानर्थक्यं श्रुतवेदान्तानां संसारानुवृत्तिदर्शनविरोधश्चेति चेन्न, प्रागुक्तप्रतिबन्धनिरासद्वारेण तयोश्श्रवणंप्रति फलोपकार्यङ्गतया विधानोपपत्तेः, संसारिलोप(पत्ते)स्सर्वस्य प्रतिबन्धकवस्तुरूपविषयत्वात्, अतो बाधकापेतसानुग्राहकश्रुत्यादिसिद्धमुक्तत्वमस्यादेः साक्षात्कारजनकत्वमिति .

अत्र ब्रूमः, यत्तावदुक्तं हेतु सिद्धवाक्येष्वपरोक्षधीहेतुत्वमदृष्टत इति तत्खरविषाणाङ्कुरप्रसाधने खरविषाणाङ्कुरनिदर्शनमिति मन्यामहे, तथा हि, संवित्स्वप्रकाशेत्यत्र तावत् सामान्यतस्स्वपरसमवेतचैकालिकसर्वसंवित्स्वप्रकाशत्वं वाक्यार्थः, तादात्विकी तु तदन्या संविदेका तदानीं स्वप्रकाशा, तत्र न सर्वसंविदां स्वप्रकाशत्वमिदानीमपरोक्षम्, यतो वाक्यस्य तदापरोक्ष्यहेतुता स्यात्, न च सर्वसंविदैक्यम्, तस्य दूषयिष्यमाणत्वात्, तदैक्येऽपि तत्तदुपहिताकारेण परोक्षापरोक्षविभागस्य दुरपह्नवत्वात्, वाक्यजन्यसंवित्स्वरूपापरोक्ष्ये तावद्वाक्यमेव कारणम्, विषयप्रकाशांशकारण-

Digitized by Google

स्वप्रतिसाधनता, उपलम्भानुरोधेनानतिप्रसञ्जकव्याप्तिमूलकतया प्रबलत्वात्, समत्वेपि प्रकरणसमत्वापादनदशायामन्योन्यप्रतिरोधस्येष्टत्वेन तत्प्रसङ्गानुपपत्तेश्च, न च विपक्षे बाध(क)विरहादप्रयोजकता, अविशेषात् शब्दान्तराणामपि प्रत्यक्षज्ञानजनकत्वप्रसङ्गस्य सत्त्वात्, नचाप्रत्यक्षार्थविषयतया तेषान्तदनुत्पादकत्वमिति वाच्यम्, तथाऽप्ययङ्घटः दशमोऽयमित्यादिवाक्यानान्तत्प्रसङ्गात्, यच्चेह भवताऽपि शब्दस्य साक्षात्कारहेतुत्वमिष्यते, इष्यतां वा, तथापि ज्योतिष्टोमादिवाक्यानान्तत्प्रसङ्गो दुर्वारः, तथापि मनस्सहकृतशब्देनैव प्रत्यक्षज्ञानञ्जायत इति साहसस्य सुशकत्वात्, तावतैव च तेषामप्रत्यक्षविषयत्वस्यापि सिद्धेरवान्तरविशेषानिर्धारणादिति, अस्तु वा विपक्षे बाधकाभावः, स तु पूर्वेषामपि समान इति, तथापि प्रतिरोधमात्रं सिद्धम्, नन्वस्ति पूर्वेषां विपक्षे बाधकमात्मविज्ञानस्य मोक्षसाधनत्वश्रुत्यन्यथाऽनुपपत्तिः, तथा हि, श्रुत्युपपत्तिभ्यां वाक्यार्थज्ञानादेव मिथ्याभूतसंसारनिवृत्तिरिति स्थिते प्रत्यक्षस्य भ्रमस्य परोक्षबाध्यत्वायोगेन प्रत्यक्षपरिशेषे ब्रह्मणि च सकलकरणागोचरेऽनुमानादिषु च साक्षात्कारवैदेशिकेषु यदि वाक्यादप्यपरोक्षज्ञानञ्च स्यादपवर्गोपि न स्यादेवेति, इदमपि दण्डघातसूदितदर्वीकरनर्तनम्, अस्याः परिपाटिकाया आरम्भ एव निरस्तत्वादिति. यः पुनरसावप्यूहः अपरोक्षत्वन्तत्त्वमस्यादिवाक्यजन्यज्ञानस्यास्ति, अपरोक्षज्ञान-

सुखादिवत्, न चाप्रयोजकत्वम्, प्रत्यक्षसिद्धाया वृत्तेः कृप्तकारणाजन्यत्वेन ज्ञानत्वायोगात् . न च तस्मिन्मनः करणमिति वाच्यम्, मनसः प्रमाश्रयत्वेन तदकरणत्वात्, अतः इन्द्रियादिवत् ज्ञानार्थत्वाच्च ज्ञानमिति प्रकृते ननु न तानीति . तदर्थत्व इति, अयम्भावः श्रवणादीनां ज्ञानत्वन्तावदनुभवसिद्धम्, ध्याने तु विधुपाद्योर्ध्यनिकरेणोपक्रमोपसंहारदर्शनेनापि ज्ञानत्वमवगम्यते . न चान्यत्र कृप्तकारणविरहादज्ञानत्वम्, ज्ञानत्वे प्रामाणिके सिद्धे सत्यन्यत्र कृप्तकारणाभावेऽपि सामग्र्यन्तरस्यैव कल्प्यत्वात् . अन्यथा प्रत्यक्षे कृप्तकारणविरहादनुमितेरप्यज्ञानत्वप्रसङ्गात्, स्वभावतस्तु मनस एव (क)कारणत्वान्नान्यत्र कृप्तकारणविरहः . न च मनसः प्रमाश्रयत्वमेवेति वाच्यम्, आत्मन एव ज्ञानाश्रयतया मनसः (क)कारणत्वसाधनात् . किञ्च निदिध्यासनन्तावत् अविच्छिन्नस्मृतिसन्तानः, ध्यानानन्तरम् एतावन्तङ्कालम्भगवन्तमस्मार्षमिति प्रयोगानुभवदर्शनात्, ध्याने "ध्रुवा स्मृति"रित्यादिश्रौतप्रयोगाच्च, स्मृतेश्च ज्ञानत्वन्तवापीष्टम्, अतस्संस्कारादेस्सत्त्वान्नान्यत्र कृप्तकारणविरहः . अतएवानुभवप्रयोगदर्शनात् दृष्ट्युपासनस्याप्याहार्यारोपसन्तानात्मकस्य ज्ञानत्वं सिद्धम् . मननमपि युक्तिभिरेवमेवैतदिति व्यवसायः, तच्च ज्ञानमेव, "मनु अवबोधने" इति धातोर्निष्पन्नत्वात् . श्रवणमपि शाब्दज्ञानविशेष एव; तथैव स्वारस्यात् . श्रवणमननयोर्निरुक्त हेतुभूत व्यापारत्वेऽपि व्याप्तिपक्षधारलाघवोपक्रमादिप्रतिसन्धा-

Digitized by Google

